चन्द्रालोकः

२२५

१०५

नं॰ ३३९

चन्द्रलोकः

१० पत्राणि

अलंकार

सम्पूर्णः

जयदेवः

पीयूषवर्ष

तेत्र

श्रीगणेशाय नमः ॥ उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ॥ हंसीव कृष्ण ते कीर्तिः स्वर्गंगा
मवगाहते ॥ १ ॥ वर्ण्योपमानधर्माणामुपमावाचकस्य च ॥ एकद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमा
ष्टधा ॥ २ ॥ तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्मम ॥ कान्त्या स्मरवधूयन्ती दृष्टा तन्वीरहो मया ॥ ३ ॥
॥ ३ ॥ येन यामि लनं तत्र लाभो मे यश्च तद्रतेः ॥ तदेतत्काकतालीयमवितर्कितसंभवं ॥ ४ ॥ उ
पमानोपमेयत्वं यदेकस्यैव वस्तुनः ॥ इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ॥ ५ ॥ पर्यायेण द्व
योस्तच्चेदुपमेयोपमा मता ॥ धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि ॥ ६ ॥ प्रतीपमुपमानस्योपमे
[redacted]त्वप्रकल्पनं ॥ त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः
॥ ७ ॥ अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत् ॥ अलं गर्वेण ते वक्त्र कान्त्या चन्द्रोऽपि तादृशः
॥ ८ ॥ वर्ण्योपमेयलाभेन तथान्यस्याप्यनादरः ॥ कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्याः सन्ति हि स्त्रियः १

तेयाजन

प्रतीपस्यात् २

यः॥९॥ वैवर्ण्ये नान्यस्योपमा याः अनिष्पत्तिर्वैच्युतं तत्॥ मुधापवादो मुग्धाक्षि त्वन्मुखाभं किलांबु
जं॥१०॥ प्रतीपमुपमानस्य कैमर्थ्यमपि मन्यते॥ दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिंदुना॥११॥ विषय्य
भेदताद्रूप्यरंजनं विषयस्य तत्॥ रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः॥१२॥ अयं हि धूर्जे
टिः साक्षाद्येन दग्धाः पुरः क्षणात्॥ अयमास्ते विना शंभुस्तार्तीयीकं विलोचनं॥१३॥ शंभुर्विश्वम
वत्यघस्वीकृतसमदृष्टितां॥ अस्या मुखेंदुना लब्धे नेत्रानंदे किमिंदुना॥१४॥ साध्वीयमपरा ल
क्ष्मीरसुधासागरोदिता॥ अयं कलंकिनश्चंद्रान्मुखचंद्रोतिरिच्यते॥१५॥ परिणामः क्रियार्थश्चे
द्विषयी विषयात्मना॥ प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा॥१६॥ बहुभिर्बहुधोल्लेखादेकस्योल्ले
ख इष्यते॥ स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः॥१७॥ एकेन बहुधोल्लेखेप्यसौ वि
षयभेदतः॥ गुरुर्वचस्यर्जुनोयं कीर्तौ भीष्मः शरासने॥१८॥ स्यात्स्मृतिभ्रांतिसंदेहैस्तदंकालंकृ

५ यांभ्रांतिनिवारणे॥तापंकरोतिसोत्कंपंज्वरःकिंनसखिस्मरः॥१८॥छेकापह्नुतिरन्यस्यशंका५

त्तित्रयं॥पंकजंपश्यतःकांतामुखंमेगाहतेमनः॥१९॥अयंप्रमत्तमधुपस्त्वन्मुखंवेत्तिपंकजं॥पं
कजंवासुधांशुर्वेत्यस्माकंतुननिर्णयः॥२०॥शुद्धापह्नुतिरन्यस्यारोपार्थोधर्मनिह्नवः॥नायंसुधां
शुःकिंतर्हिव्योमगंगासरोरुहं॥२१॥सएवयुक्तिपूर्वश्चेदुच्यतेहेत्वपह्नुतिः॥नेंदुस्तीव्रोननिश्यर्कः
सिंधोरौर्वोयमुत्थितः॥२२॥अन्यत्रतस्यारोपार्थःपर्यस्तापह्नुतिश्चसा॥नायंसुधांशुःकिंतर्हिसुधांशुः
प्रेयसीमुखं॥२३॥भ्रांतापह्नुतिरन्यस्यशंकातस्तथ्यनिह्नवे॥प्रजल्पन्मत्पदेलग्नःकांतःकिंनहिनूपुरः
॥२४॥कैतवापह्नुतिर्व्यक्तौव्याजाद्यैर्निह्नुतेःपदैः॥निर्यांतिस्मरनाराचाःकांताद्दृक्पातकैतवात्॥२५
संभावनास्यादुत्प्रेक्षावस्तुहेतुफलात्मना॥उक्तानुक्तास्पदाद्यात्रसिद्धासिद्धास्पदेपरे॥२६॥धूमस्तो
मंतमःशंकेकोकीविरहशुष्मणां॥लिंपतीवतमोंगानिवर्षतीवांजनंनभः॥२७॥रक्तौतवांघ्रीमृदु
लौभुविविक्षेपणाद्ध्रुवं॥त्वन्मुखाभेच्छयानूनंपद्मैर्वैरायतेशशी॥२८॥मध्यःकिंकुचयोर्धृत्यैबद्धः २

कनकदामभिः॥प्रायोज्वंतस्यदेनैवकंप्राप्तुंतोयेनपश्यति॥३०॥रूपकातिशयोक्तिःस्यान्निगीर्या
ध्यवसानतः॥पश्यनीलोत्पलद्वंद्वान्निःसरंतिशिताःशराः॥३१॥यद्यपह्नुतिगर्भत्वंसैवसापह्न
वामता॥त्वत्सूक्तिषुसुधाराजन्भ्रांताःपश्यंतितांविधौ॥३२॥भेदकातिशयोक्तिःस्तुतस्यैवा
न्यत्ववर्णनं॥अन्यदेवास्यगांभीर्यमन्यद्धैर्यंमहीपतेः॥३३॥संबंधातिशयोक्तिःस्यादयोगेयो
गकल्पनं॥सौधाग्राणिपुरस्यास्यस्पृशंतिविधुमंडलं॥३४॥योगेप्ययोगःसंबंधातिशयोक्ति
रितीर्यते॥त्वयिदातरिराजेंद्रस्वर्द्रुमान्नाद्रियामहे॥३५॥अक्रमातिशयोक्तिःस्यात्सहत्वेहेतुका
र्ययोः॥आलिंगंतिसमंदेवज्यांशराश्चपरांश्चते॥३६॥चपलातिशयोक्तिःस्यात्कार्येहेतुप्रस
क्तिजे॥यास्यामीत्युदितेतन्व्यावलयोभवदूर्मिका॥३७॥अत्यंतातिशयोक्तिःस्यात्पौर्वापर्य
व्यतिक्रमे॥अग्रेमानोगतःपश्चादनुनीताप्रियेणसा॥३८॥वर्ण्यानामितरेषांवाधर्मैक्यंतु

स्ययोगिता॥संकुचंतिसरोजानिस्वैरिणीवदनानिच॥३९॥त्वदंगमार्दवेदृष्टेकस्यचित्तेनभास
ते॥मालतीशशभृल्लेखाकदलीनांकठोरता॥४०॥हिताहितेवृत्तितौल्यमपरातुल्ययोगिता
॥प्रदीयतेपराभूतिर्मित्रशात्रवयोस्त्वया॥४१॥गुणोत्कृष्टैःसमीकृत्यवचोन्यातुल्ययोगिता॥लो
कपालोयमःपाशीश्रीदःशक्रोभवानपि॥४२॥वदंतिवर्ण्यावर्ण्यानांधर्मैक्यंदीपकंबुधाः॥मदेन
भातिकलभःप्रतापेनमहीपतिः॥४३॥त्रिविधंदीपकावृत्तौभवेदावृत्तिदीपकं॥वर्षत्यंबुदमालेयं
वर्षत्येषाचशार्वरी॥४४॥उन्मीलंतिसरोजानिस्फुरंतिकुटजोद्गमाः॥माद्यंतिचातकास्तृप्तामाद्यं
तिचशिखिर्वबलाः॥४५॥वाक्ययोरेकसामान्येप्रतिवस्तूपमामता॥तापेनभ्राजतेशूरःशूरश्चा
पेनराजते॥४६॥चेद्बिंबप्रतिबिंबत्वंदृष्टांतस्तदलंकृतिः॥त्वमेवकीर्तिमान्राजन्विधुरेवहिकां
तिमान्॥४७॥वाक्यार्थयोःसदृशयोरैक्यारोपोनिदर्शना॥यद्दातुःसौम्यतासेयंपूर्णेंदोरकलंक ३

ना॥४८॥पादार्थावृत्तिमप्येके वदंत्यस्यां निदर्शनां॥ त्वन्नेत्रयुगलं धत्ते लीलां नीलांबुज
न्मनोः॥४९॥ अपरं बोधनं प्राहुः किं पृथास्तत्सदर्थयोः॥ नश्येद्राजविरोधीति क्षीणं चंद्रोद
येनमः॥५०॥ उदयन्नेव सविता पद्मेष्वर्पयति श्रियं॥ विभावयन्समृद्धीनां फलं सुहृदनुग्रहं
॥५१॥ व्यतिरेको विशेषश्चेदुपमानोपमेययोः॥ शैला इवोन्नताः संतः किंतु प्रकृतिकोम
लाः॥५२॥ सहोक्तिः सहभावश्चेद्भासते जनरंजनः॥ दिगंतमगमत्तस्य कीर्तिः प्रत्यर्थिभिः
सह॥५३॥ विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते॥ विद्या हृद्यापि सावद्या विना विनय
संपदं॥५४॥ तच्चेत्किंचिद्विना रम्यं विनोक्तिः सापि कथ्यते॥ विनाखलैर्विभात्येषा राजेंद्र भवतः
सभा॥५५॥ समासोक्तिः परिस्फूर्त्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्॥ अयमैंद्रीमुखं पश्य रक्तश्चुं
बति चंद्रमाः॥५६॥ अलंकारः परिकरः साभिप्राये विशेषणे॥ सुधांशुकलितोत्तंसस्ता

यं हरस्तु वः शिवः ॥५७॥ साभिप्राये विशेष्ये तु भवेत्परिकरांकुरः ॥ चतुर्णां पुरुषार्थानां दा
ता देवश्चतुर्भुजः ॥५८॥ नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः ॥ सर्वदो माधवः पातु
स योगं गामदीधरत् ॥५९॥ अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना ॥ उच्चरद्भूरिकीलाल
: शुशुभे वाहिनीपतिः ॥६०॥ अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया ॥ एकः कृती शकुंतेषु
योऽन्यं शक्रान्न याचते ॥६१॥ प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुतांकुरः ॥ किं भृंग सत्यां मालत्यां
केतक्या कंटकेद्धया ॥६२॥ पर्यायोक्तं तु गम्यस्य वचो भंग्यंतराश्रयं ॥ नमस्तस्मै कृतो येन मु
धा राहुवधूकुचौ ॥६३॥ पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनं ॥ यामि चूतलतां द्रष्टुं युवा
भ्यामास्यतामिह ॥६४॥ उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां [illegible]तिस्तु निंदयोः ॥ कः स्वर्धुनि विवेक
स्ते पापिनो नयसे दिवं ॥६५॥ साधु दूति पुनः साधु कर्तव्यं किमतः परं ॥ यन्मदर्थे विलूनासि ४

दं तैरपि नखैरपि ॥ ६६ ॥ निंदाया निंदया व्यक्तिर्व्याजनिंदेति गीयते ॥ विधे स निंद्यो यस्ते प्रागेकमे
वाहरच्छिरः ॥ ६७ ॥ आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ॥ चंद्र संदर्शयात्मानमथवास्ति
प्रियामुखं ॥ ६८ ॥ निषेधाभासमाक्षेपं बुधाः केचन मन्वते ॥ नाहं दूती तनोस्तापस्तस्याः कालानल
लोपमः ॥ ६९ ॥ आक्षेपोन्यो विधौ व्यक्ते निषेधे च तिरोहिते ॥ गच्छ गच्छसि चेत्कांत तत्रैव स्याज्ज
निर्मम ॥ ७० ॥ आभासत्वे विरोधस्य विरोधाभास इष्यते ॥ विनापि तन्वि हारेण वक्षोजौ तव
हारिणौ ॥ ७१ ॥ विभावना विनापि स्यात्कारणं कार्यजन्म चेत् ॥ अप्यलाक्षारसासिक्तं रक्तं त्वच्च
रणद्वयं ॥ ७२ ॥ हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता ॥ अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति
मन्मथः ॥ ७३ ॥ कार्योत्पत्तिस्तृतीया स्यात्सत्यपि प्रतिबंधके ॥ नरेंद्रानेव ते राजन्दशत्यसिभुजं
गमः ॥ ७४ ॥ अकारणात्कार्यजन्म चतुर्थी स्याद्विभावना ॥ शंखाद्वीणानिनादोयमुदेति महदद्भुतं

॥८५॥ विरुद्धात्कार्यसंपत्तिः काचित् दृष्टा विभावना॥ शीतांशुकिरणास्तन्वि हंत संतापयंति तां॥
८६॥ कार्यात्कारणजन्मापि काचित् दृष्टा विभावना॥ यशःपयोधिरभवत्करकल्पतरोस्तव॥ ८७
कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे॥ हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि॥८८॥
-असंभवाऽर्थनिष्पत्तेरसंभाव्यत्ववर्णनं॥ को वेद गोपशिशुकः शैलमुत्पाटयेदिति॥८९॥ विरु
द्धं भिन्नदेशत्वं कार्यहेत्वोरसंगतिः॥ विषं जलधरैः पीतं मूर्छिताः पथिकांगनाः॥९०॥ -अन्यत्र
करणीयस्य ततोऽन्यत्र कृतिश्च सा॥ -अपारिजातां वसुधां चिकीर्षन् द्यां तथाऽकृथाः॥९१॥ -अन्य
त्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिश्च सा॥ गोत्रोद्धारप्रवृत्तोऽपि गोत्रोद्वेगं पुराकरोः॥९२॥ विषमं वर्ण्य
ते यत्र घटनाननुरूपयोः॥ क्वेयं शिरीषमृद्वंगी क्व तावान्मदनज्वरः॥९३॥ विरूपकार्यस्योत्प
त्तिरपरं विषमं मतं॥ कीर्तिं प्रसूते धवलां श्यामा तव कृपाणिका॥९४॥ -अनिष्टस्याप्यवाप्तिश्च ५

तद्विशिष्टार्थसमुद्यमात् ॥ भक्ष्याशयाहिमंजूषां दृष्ट्वाखुस्तेन भक्षितः ॥८५॥ समं स्याद्वर्णनं यत्र
द्वयोरप्यनुरूपयोः ॥ स्वानुरूपं कृतं सद्म हारेण कुचमंडलं ॥८६॥ सारूप्यमपि कार्यस्य कारणे
न समं विदुः ॥ नीचप्रवणता लक्ष्मि जलजायास्तवोचिता ॥८७॥ विना निष्टं च तत्सिद्धिर्यदर्थं कर्तुमु
द्यमः ॥ युक्तो वारणलाभोयं स्यान्न ते वारणार्थिनः ॥८८॥ विचित्रं तत्प्रयत्नश्चेद्विपरीतफलेच्छया
॥ नमंति संतस्त्रैलोक्यादपि लब्धुं समुन्नतिं ॥८९॥ अधिकं पृथुलाधारादाधेयाधिक्यवर्णनं
ब्रह्मांडानि जले यत्र तत्र मांति न ते गुणाः ॥९०॥ पृथ्वाधेयाद्यदाधाराधिक्यं तदपि तन्मतं ॥ किय
द्वाग्ब्रह्म यत्रैते विश्राम्यंति गुणास्तव ॥९१॥ अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता ॥ मणि
मालोर्मिका तेद्य करे जपवलायते ॥९२॥ अन्योन्यं नाम यत्र स्यादुपकारः परस्परं ॥ त्रियामा शशि
ना भाति शशि भाति त्रियामया ॥९३॥ विशेषः ख्यातमाधारं विनाप्याधेयव [redacted]

र्णनं ॥ गतेपि सूर्ये दीपस्थास्तमश्छिंदंतितत्कराः ॥ ९४ ॥ विशेषः सोपि यथैकं वस्त्वनेकत्रवर्ण्य
ते ॥ अंतर्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सैव मे ॥ ९५ ॥ किंचिदारंभतो शक्यवस्त्वंतरकृतिश्च सः ॥
त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणं ॥ ९६ ॥ स्याद्व्याघातोन्यथाकारि तथाकारि क्रियेत चे
त् ॥ यैर्जगत्प्रीयते हंति तैरेव कुसुमायुधः ॥ ९७ ॥ सोकर्येण निबद्धापि क्रिया कार्यविरोधिनी ॥ द
याचेद्वृद्धिमप्यपरित्याज्य एव ते ॥ ९८ ॥ गुंफः कारणमाला स्याद्यथाप्राक्प्रांतकारणे ॥ नयेन
श्रीः श्रिया यायागस्त्यागेन विपुलं यशः ॥ ९९ ॥ गृहीतमुक्तरीत्यार्थश्रेणिरेकावलिर्मता ॥ नेत्रे कर्णां
त विश्रांते कर्णौ दोस्तंभदोलिनो ॥ १०० ॥ दोस्तंभौ जानुपर्यंतप्रलंबनमनोहरौ ॥ जानुनी रत्नमु
कुराकारे तव महीभुजः ॥ १०१ ॥ दीपकैकावलीयोगान्मालादीपकमिष्यते ॥ स्मरेण हृदये तस्या
स्तेन त्वयि कृता स्थितिः ॥ १०२ ॥ उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते ॥ मधुरं मधु तस्माच्च सुधा ६

तस्याः कवेर्वचः॥१०३॥यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः॥शत्रुं मित्रं विपत्तिं च जयर
जयभंजय॥४॥पर्यायो यद्दि पर्याये ऽनेकस्यानेकसंश्रयः॥पद्मं मुक्त्वा गता चंद्रं कामिनीवदनप्र
भा॥५॥एकस्मिन्नप्यनेकं वा पर्यायः सोपि संमतः॥अधुना पुलिनं तत्र स्रोतः पुराजनि॥६॥परि यत्र
वृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः॥जग्राहैकं शरं मुक्त्वा कटाक्षात्स रिपुश्रियं॥७॥परि
संख्या निषिध्यैकमेकस्मिन्वस्तुयंत्रणं॥स्नेहह्रासः प्रदीपेषु न स्वांतेषु नतभ्रुवां॥८॥विरो
धे तुल्यबलयोर्विकल्पालंकृतिर्मता॥सद्यः शिरांसि चापान्वा नमयंतु महीभुजः॥९॥बहूनां यु
गपद्भावभाजां गुंफः समुच्चयः॥नश्यंति पश्चात्पश्यंति त्रस्यंति च तव द्विषः॥१०॥अहंप्राथ
मिकाभाजामेककार्यान्वयेपि सः॥कुलं रूपं वयो विद्या धनं च मदयंत्यमुं॥११॥क्रमिके कगता
नां तु गुंफः कारकदीपकं॥गच्छत्यागच्छति पुनः पांथः पश्यति पृच्छति॥१२॥समाधिः कार्यसौ

कर्यंकारणंनरसंनिधेः ॥ उल्लंघिताचतरुणीजगामास्तंचभानुमान् ॥ १३ ॥ प्रसनीकंबलवतःश

भवः२ त्रोःपक्षेपराक्रमः ॥ जैत्रनेत्रानुगौकर्णावुत्पलाभ्यामधःकृतौ ॥ १४ ॥ कैमुत्येनार्थसंसिद्धिःका

व्यार्थापत्तिरिष्यते ॥ सजितस्त्वन्मुखेनेंदुःकावार्त्तासरसीरुहां ॥ १५ ॥ समर्थनीयस्यार्थस्यका

7 व्यलिंगंसमर्थनं ॥ जितोसिमंदकंदर्पमच्चित्तेस्तित्रिलोचनः ॥ १६ ॥ उक्तिरर्थांतरन्यासःस्या

त्सामान्यविशेषयोः ॥ हनूमानब्धिमतरद्दुष्करंकिंमहात्मनां ॥ १७ ॥ गुणवद्वस्तुसंसर्गाद्या

तिस्वल्पोपिगौरवं ॥ पुष्पमालानुषंगेणसूत्रंशिरसिधार्यते ॥ १८ ॥ यस्मिन्विशेषसामान्य

विशेषाःसविकस्वरः ॥ सनजिग्येमहांतोहिदुर्धर्षाःसागराइव ॥ १९ ॥ प्रौढोक्तिरुत्कर्षाहेतौ

तद्धेतुत्वप्रकल्पनं ॥ कचाःकलिंदजातीरतमालस्तोममेचकाः ॥ २० ॥ संभावनंयदीत्थंस्यादि

त्यूहो[illegible]न्यस्यसिद्धये ॥ यदिशेषोभवेद्वक्ताकथिताःस्युर्गुणास्तव ॥ २१ ॥ किंचिन्मिथ्यात्वसि ७

ह्यर्थं मिथ्यार्थांतरकल्पनं ॥ मिथ्याध्यवसितिर्वेश्यां वशयेत्खवस्रजं वहन् ॥ २२ ॥ प्रस्तुते वर्ण्ये वा
क्यार्थप्रतिबिंबस्य वर्णनं ॥ ललितं निर्गते नीरे सेतुमेषा चिकीर्षति ॥ २३ ॥ उत्कंठितार्थसंसिद्धि
र्विना यत्नं प्रहर्षणं ॥ तामेव ध्यायते तस्मै विसृष्टा सैव दूतिका ॥ २४ ॥ वांछितादधिकार्थस्य सं
सिद्धिश्च प्रहर्षणं ॥ दीपमुद्योजयेद्यावत्तावदभ्युदितो रविः ॥ २५ ॥ यत्नादुपायसिद्ध्यर्थात्साक्षा
ल्लाभः फलस्य च ॥ निध्यंजनौषधीमूले खनता साधितो निधिः ॥ २६ ॥ इष्यमाणविरुद्धा
र्थसंप्राप्तिस्तु विषादनं ॥ दीपमुद्योजये द्यावन्निर्वाणस्तावदेव सः ॥ २७ ॥ एकस्य गुणदोषा
भ्यामुल्लासोन्यस्य तौ यदि ॥ अपि मां पावयेत्साध्वी स्नात्वेतीच्छति जाह्नवी ॥ २८ ॥ काठिन्यं कुच
योः स्रष्टुं वांछंत्यः पादपद्मयोः ॥ निंदंति च विधातारं त्वद्धाटीष्वरियोषितः ॥ २९ ॥ तदन्यागुणध
नस्ये वयन्ता भयति सज्जनं ॥ लाभोयमेव भूपाल सेवकानां न चेद्धनं ॥ ३० ॥ तान्यां तो

यदि न स्यातामवज्ञालंकृतिश्च सा॥ स्वल्पमेवांबु लभते प्रस्थं प्राप्यापि सागरं॥२१॥ मीलंति
यदि पद्मानि का हानिरमृतद्युतेः॥ दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्॥२२॥ विपदः
संतु नः शश्वद्यासु संकीर्त्यते हरिः॥ लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं॥२३॥ अखिलेषु
विहंगेषु हंत स्वच्छंदचारिषु॥ शुकपंजरबंधस्ते मधुराणां गिरां फलं॥२४॥ सूच्यार्थसूचनं मु
द्रा प्रकृतार्थपरैः पदैः॥ नितंबगुर्वी तरुणी दृग्युग्मविपुला च सा॥२५॥ क्रमिकं प्रकृतार्था
नां न्यासं रत्नावलिं विदुः॥ चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते॥२६॥ तद्गुणः स्वगुण
त्यागादन्यदीयगुणग्रहः॥ पद्मरागायते नासामौक्तिकं ते धरात्विषा॥२७॥ पुनः स्वगुणसंप्रा
प्तिः पूर्वरूपमुदाहृतं॥ हरकंठांशुलिप्तोपि शेषस्त्वद्यशसा सितः॥२८॥ पूर्वावस्थानुवृत्ति
श्च विकृते सति वस्तुनि॥ दीपे निर्वापितेप्यासीत्कांचीरत्नैर्महन्महः॥२९॥ संगतान्यगुणानं ६

३ भेदे ह्रणेवन लक्ष्यते ॥ ३८ ॥ सोनाम लक्षितो नायाः यस्याः स्वरणेसहजारूणे ॥ ३९ ॥ सामान्यं यदि सादृश्या

गीकारमाकुरतकुर्णं ॥ चिरं रागिणि मच्चित्ते निहितापि न रज्यसि ॥ ४० ॥ प्राकि दुःस्वगुणोत्क
र्षोऽनुगुणः परसंनिधेः ॥ नेत्रोत्पलानि र धते कराक्षैरतिनीलतां ॥ ४१ ॥ मीलिते यदि सादृश्या
द्विशेषो नोपलक्ष्यते ॥ पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवां ॥ ४३ ॥ भेदवैशिष्ट्ययोः २
स्फूर्तावुन्मीलितविशेषकौ ॥ हिमाद्रित्वद्यशोमग्नं सुराः श्वेतेन जानते ॥ ४४ ॥ लक्षितान्युदिते
चंद्रे पद्मानि च मुखानि च किंचिदाकूतसहितं स्याद्गूढोत्तरमुत्तरं ॥ ४५ ॥ यत्रासौ वेतसी
पांथ तत्रेयं सुतरा सरित् ॥ प्रश्नोत्तरांतराभिन्नमुत्तरं चित्रमुच्यते ॥ ४६ ॥ केदारपोषणरताः
के खेटाः किंचलं वयः ॥ सूक्ष्मं पराशयाभिज्ञे तरसाकूतचेष्टितं ॥ ४७ ॥ मयि पश्यति साके
शैः सीमंतमणिमावृणोत् ॥ पिहितं परवृत्तांतं ज्ञातुः साकूतचेष्टितं ॥ ४८ ॥ प्रिये गृहागते ।
प्रातः कांता तल्पमकल्पयत् ॥ व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनं ॥ ४९ ॥ सखि प

रपुरहारामपुष्पाग्रेरश्मिधूसरा ॥ गूढोक्तिरन्योद्देशेचेद्यदन्यंप्रतिकथ्यते ॥ ५० ॥ वृषापे
हि परक्षेत्रादायाति क्षेत्ररक्षकः ॥ विवृतोक्तिः श्लिष्टगुप्तं कविनाविकृतं यदि ॥ ५१ ॥
वृषापेहि परक्षेत्रादिति वक्ति ससूचनं ॥ युक्तिः पराभिसंधानं क्रियया मर्मगुप्तये ॥ ५२ ॥
त्वामालिखंतीं दृष्ट्वान्यं धनुः पौष्पं करे लिखत् ॥ लोकप्रवादानुकृतिर्लोकोक्तिरिति क
थ्यते ॥ ५३ ॥ सहस्व कतिचिन्मासान्मीलयित्वा विलोचने ॥ छेकोक्तिर्यत्र लोकोक्तेः स्या
दर्थांतरगर्भिता ॥ ५४ ॥ भुजंग एव जानीते भुजंगचरणं सखे ॥ वक्रोक्तिः श्लेषकाकु
भ्यामपरार्थप्रकल्पनं ॥ ५५ ॥ मुंचमानं दिनं प्राप्तं नेह नंदी हरांतिके ॥ स्वभावोक्तिः स्व
भावस्य जात्यादिस्थस्य वर्णनं ॥ ५६ ॥ कुरंगैरुत्तरंगाक्षैः स्तब्धकर्णैरुदीक्ष्यते ॥ भा
विकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनं ॥ ५७ ॥ अहं विलोकयेद्यापि युध्यंतेत्र सुरासु १९

[redacted]रा:॥७दात्तमृद्धिचरितं श्लाघ्यं चान्योपलक्षणं॥५८॥ सा नौ यस्या भवद्भुहूंत
ऊर्जेति क्लिरी[redacted]रिनो:॥ प्रस्तुक्तिरत्युत्तातथ्यशौर्यौदार्यादिवर्णनं॥५९॥ त्वयि सात
मूर्जेन्द्रयाचकाः कल्पशाखिनः॥ निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनं॥१६०॥ ई
[redacted]दृशैश्चरितैर्जाने सत्यं दोषाकरो भवान्॥ प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्त
नं॥१६१॥ न द्यूतमेनत्कितव क्रीडनं निशितैः शरैः॥ सिद्धस्यैव विधानं यत्तामाहुर्विध्य
लंकृतिं॥१६२॥ पंचमोदंचने काले कोकिलः कोकिलो भवेत्॥ हेतोर्हेतुम[redacted]ता सा[redacted]र्धं व
र्णनं हेतुरुच्यते॥१६३॥ असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवां॥ हेतुहेतुमतोरैक्यं
हेतुं केचित्प्रचक्षते॥१६४॥ लक्ष्मीविलासा विदुषां कटाक्षाः वेंकटप्रभोः॥ इत्थं शतमल
लंकारा लक्षयित्वा निदर्शिताः॥१६५॥ प्राचामाधुनिकानां च मतान्यालोच्य सर्वतः॥ इ

10

ति चंद्रालोकः समाप्तः ॥

चंद्रालोक काव्य

१८

१०